International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 04-09
© 2021 IJSR
www.anantaajournal.com
Received: 07-11-2020
Accepted: 13-12-2020

**Dr. GV Phani Raja Sastry**
Assistant Professor, Apastamba Pourohitya, S.V.Vedic University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Dr. GV Phani Raja Sastry**
Assistant Professor, Apastamba Pourohitya, S.V.Vedic University, Tirupati, Andhra Pradesh, India

# वेद-पुराणेषु मानवमौल्यनिरूपणम्

**Dr. GV Phani Raja Sastry**

## प्रस्तावना

वेदो नाम विश्वमान्यायाः सनातनभारतीयसंस्कृतिपरम्परायाः प्राणः। स च परमेश्वरस्य वाङ्मयविभूतिः । "अस्य महतो भूतस्य निःश्वसितमे तद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः" इत्यादि वाक्यानि बृहदारण्यकोपनिषदि प्रसिद्धानि एव ।" वेदः शिवः शिवोवेदः" -------- इत्यादिस्मृतिवचनान्यपि विषयममुं समर्थयन्ति । बृहदारण्यक श्रुतौ श्रीशङ्करभगवत्पादैः विवृता "नियतरचनावतो विद्यमानस्यैव वेदस्याभिव्यक्तिः पुरुष निःश्वासवत् न च चक्षुर्बुद्धिप्रयत्नपूर्वकः वेदः" इति ।

कृत्स्नां मानवजातिं श्रेयः प्रापयितुं ब्रह्मणो निर्गतो ज्ञानपुञ्जो वेद इत्याख्यायते इति । समेषामास्तिकानामनिष्टविनाशाय, दुःखव्यावर्तनाय, इष्टार्थसाधनाय, निरन्तरसुख जीवनो द्भावनाय, प्रकाममलौकिकानुपायान् वेदयत्ययं वेदग्रन्थः।

ततोऽधिकं येन केनचित् सुकृतविशेषेण संप्राप्तमनुष्यजनुषः सार्थक्यमवेप्सूनां विचिकित्सूनां जननमरणरूपसंसारचक्रस्य षड्भावविकारनिवृत्तिपूर्वकं पुनरावृत्तिरहितनिरतिशयसुखास्पद ब्राह्मीस्थितिसाधनभूतान् पथश्च सन्दर्शयति वेदः ।

एवं ऐहिकसुखप्रापणाय, स्वर्गादिपरलोकसाधनायचोपायान् बोधयित्वा, आत्यन्तिक सुखं ब्रह्मानन्दात्मकमधिगन्तु पथदर्शिका वर्तते श्रुतिः। एतादृशलक्षणयुक्ते वेदराशौ नैकानि मानवमौल्यानि अहिंसारूपादीनि नैकधोपदिष्टानि।"मा- हिंस्यात्सर्वभूतानि" इत्येतादृशान्यहिंसा प्रतिपादकानि वाक्यानि वेदेषूपलभ्यन्ते, वेदेषु प्रतिपाद्यमाना अहिंसा लोकविलक्षणा भवति, लोके यस्य कस्यचित् प्राणिनः पिपीलिकादेरपि हिंसा न कर्तव्येति "अहिंसा परमो धर्मः" इति शास्त्रानुसारमुच्यते । वेदे तावत् ओषध्यादीनां छेदनावहननादि वधोऽपि हिंसारूपेण परिगण्यते ।

"देवावै हविर्भृत्वाब्रुवन् । कस्मिन्निदं म्रक्ष्यामह इति"। कृष्णयजुर्वेदतैत्तिरीयब्राह्मणे विचारोऽयं संप्रवर्तते।

अत्रायमर्थः - देवाः कदाचित् यागमनुतिष्ठन्तस्सन्तो देवताप्रीतये पुरोडाशादिहविस्संपादनाय व्रीह्यवहननमकुर्वन्, एतादृश व्रीह्यवहननसंस्कारेण पुरोडाशात्मकं हविः संपाद्यते। एतादृश हविस्संपादनानन्तरं देवानां कश्चन अभिप्रायस्संजातः, व्रीह्यादि धान्यविशेषाणां अवघातरूप हिंसया पापमस्माकं समजनि, कथंपरिहर्तव्यमिति।

ननु व्रीह्यादिधान्य विशेषावघातेऽपि कथं हिंसा स्यात् ? प्रणिहिंसा खलु हिंसया संभाव्यते इति संशीतिरूत्पद्यते। ओषधिवनस्पत्यादयः गवाश्वादिवत् प्राणिनो न भवन्ति खलु इति चेदुच्यते । "अन्तस्संज्ञा भवन्त्येते सुखदुःख समन्विताः[1]" इति मनुना उपदिष्टत्वात् ओषधिवनस्पत्यादीनामपि प्राणित्वं संगच्छत एव ।

अत्रेदमवगन्तव्यम् - स्वभावतः धान्यादिबीजेषु अङ्कुरोत्पादकशक्तिरस्ति, अत एव वृक्षोत्पात्तिर्भवति अस्मात् कारणात् लोकेऽपि सजलक्षेत्रेषु वाय्वादिसाहाय्येन बीजादङ्कुरः, अङ्कुराद्वृक्षः इत्यास्माभिः दृश्यते। अतस्सजीवानां वृक्षादीनामुत्पादकत्वेन बीजादीनामपि सजीवत्वमवश्यमङ्गीकर्तव्यम्, कार्यकारणयोरेकरूप्यात् तथा च यावन्त्यस्मद्गृहे विद्यमानानि व्रीह्यादिधान्यानि तावतां सर्वेषां अङ्कुरोत्पत्तिद्वारा सजीववृक्षोत्पादकत्वात् सजीवत्वमवश्यमुररीकर्तव्यम्,

सर्वेषु जीवेषु जीवप्रतीको भवति कश्चनरसः। वृक्षेषु, लतासु, प्राणिषु,गगनचरेषु, जलचरेषु च रुधिरस्रावादिरूपो दृश्यतेऽयं जीवरसः, यावत्प्रदेशं जीवरसो दृश्यते तावद्भागं वृक्षस्सजीवः। शुष्के च जीवकला लुप्तेति जगति वयं प्रेक्षामहे।

लोकेऽपि जगदीश चन्द्रवसु (बोस्) नामको भारतीय शास्त्रेक्षकः ओषधीनां वृक्षानाञ्च जीवत्वं भवत्येवेति सप्रमाणं निरूपयाञ्चकार। एवं "गतिबुद्धिप्रत्यवसानार्थ शब्दकर्माकर्मकाणामणिकर्ता स णौ" इति पाणिनीयसूत्रे प्रत्यवसान शब्देन भक्षणार्थः स्वीक्रियते। सूत्रेणामुना गत्याद्यर्थानां धातूनां द्विकर्मकत्वं विधीयते, अत्र सूत्रे "भक्षेरहिंसार्थस्य न" इति वार्तिककृता अहिंसार्थभक्षधातोः द्विकर्मकत्वं वारितम्।

तत्रोदाहरणं "भक्षयत्यन्नं वटुना" इति, वार्तिके प्रत्युदाहरणन्तु "भक्षयति बलीवर्दान् सस्यम्" इति अत्रोदेति शङ्का, सस्य भक्षणं, हिंसा कथं भवेत् इति अत्र भट्टोजिदीक्षितः बालमनोरमाव्याख्याने एवं व्याख्याञ्चकार, क्षेत्रे प्ररूढमूलं सस्यमिह विवक्षितम् तस्य तदानीमन्तः प्रज्ञजीवत्वात् तद्भक्षणं हिंसैवेति, एवञ्च एतादृशसजीवव्रीह्यादिबीजावघातेन प्राणिहिंसा भवत्येव हिंसाजन्यपापलेपः अस्मासु संक्रान्तः, एषः पापलेपः कुत्र निक्षेपणीयः इति देवानां संशयः समुत्पन्नः।

**अत एव स्मृतिकारा**

"खण्डिनी पेषिणी छुल्ली उदकुम्भी च मार्जनी।
पञ्चसूनागृहस्थस्य ताभिः स्वर्गं न विन्दति[2]।।

पशुवधस्थानं जङ्गमस्थावरादिप्राणिनां सूदयन्तीति सूनाः हिंसा इत्यर्थः। छुल्ली पाकस्थानम् प्रेषिणी दृषदुपला, छुल्यादयः, पञ्चगृहस्थस्य हिंसास्थानानि भवन्ति –

"पञ्चसूनाकृतं पापं पञ्चयज्ञैः व्यपोह्यते" ।

तदुक्तं यमोऽपि –

"एतानि वाहयन्विप्रो बध्यते वै मुहुर्मुहुः।
एतासां पावनार्थाय पञ्चयज्ञाः प्रकीर्तिताः"[3]।। इति

अत एव भगवद्गीतायां भगवता श्रीकृष्णेन "यज्ञशिष्टाशिनस्सन्तो मुच्यन्ते सर्वकिल्बिषैः"[4] इति प्रत्यपादि (भ,गी,4–31) अत्र

---

[1] तै.ब्रा. 3-8-64

[2] मनु.स्मृ. 3-68

[3] य.स्मृ. 6-43

[4] भ.गी. 4.31

आचार्याः शङ्करभगवत्पादाः व्याख्याने देवयज्ञादीन् समनुष्ठाय तच्छिष्टं अशनं अमृताख्यं अशितुं शीलं येषां ते - यज्ञशिष्टाशिनस्सन्तो मुच्यन्ते सर्वकिल्बिषैः छुल्यादि पञ्चसूनाकृतैः सर्वपापैः इति प्रत्यपादयन् । पूर्वोक्तरीत्या देवेषु बीजाद्यवहनन प्रयुक्तहिंसाजन्यपापं कुत्र निक्षेपणीयमिति परस्परं आलोचनातत्परेषु देवेषु सत्सु अग्निदेवः एवमब्रवीत् – हे देवाः अहं भवदीय हिंसापापनिक्षेपयोग्यं कञ्चन पुरुषमुत्पादयिष्यामीति तदर्थं भवन्तस्सर्वे मां प्रविशध्वमिति, तदा देवा एवमकुर्वन् अग्निः सर्वदेवात्मकः आसीत्, ततोऽग्निः सर्वदेवैः निक्षिप्तं यद्वीर्यं तत्स्वीय रूपान्तरांगारद्वारा उदके त्रिवारं प्राक्षिपत् । तस्मादुदकात् क्रमेण एकत-द्वित-त्रित इति च त्रयो देवा अजायन्त, एते एव देवाश्रितव्रीहिवधजनितपापप्रक्षेपयोग्याः इति देवान् प्रत्यबोधयत् अग्निः ।

एवं देवाः स्वीयकर्मानुष्ठानकाले यागीयव्रीह्यवहननप्रयुक्तं यत् स्वसंक्रान्तं पापमिदं हिंसाजन्यमिति "अहिंसा परमो धर्म" इति अहिंसा रूपधर्मसिध्यर्थं एकतादि देवेषु निक्षिप्य परिशुद्धा अभूवन्निति कृष्णयजुर्वेद तैत्तिरीयब्राह्मणेन एवं "अहिंसास्वरूपं" प्रादर्शि । किञ्चैवमेव कृष्णयजुर्वेद तैत्तिरीयसंहितायां दर्शपूर्णमासयागप्रकरणे दर्भच्छेदनप्रसङ्गे दर्भसमूहमुद्दिश्य अध्वर्युरेवं ब्रूते ।

देवानां परिषूतमसि वर्षवृद्धमसि इति, अत्र विद्यारण्यभाष्यमेवं वर्तते – भो दर्भजात त्वं देवानामर्थे परिगृहीतमसि न तु ममगृहाच्छदनार्थम् अतो मे न लवन दोषोऽस्ति, वर्षेण पुनर्वृद्धिसंभवात्, तवापि न हानिः मामयं वृथैवलविष्यतीति त्वया न द्वेष्टव्यम्। अत्र ब्राह्मणमेवं व्याचष्टे । अथो यथा वस्यसे प्रतिप्रोच्याऽऽहेदं करिष्यामीति। एवमेव तदध्वर्युर्देवेभ्यः प्रतिप्रोच्य बर्हिर्दाति। आत्मनोऽहिंसायै[5] (तै.ब्रा.3-2-2) इति। यथा लोके कश्चित्भृत्यः राजनियोगात् ग्रामेषु गत्वा बलाद्गृह्यमाणं दधिक्षीरादिद्रव्यं वसुमत्तमाय राज्ञे, न तु मदर्थमिति जनानामग्रे प्रतिप्रोच्य निर्भयस्सन् सर्वथेदं हरिष्यामीति ब्रूते । तद्वदध्वर्युरपि देवानामर्थे दर्भाणां छेदनेन मम लवनरूपहिंसाजन्यपापसम्बन्धः नास्तीति आत्मनोऽहिंसायै इति ब्राह्मणवाक्यात् स्वस्य अहिंसामेव प्रकटयति। अपि च शतवलशं विरोह इति अध्वर्युर्ब्रूते - हे दर्भकाण्ड अनेन छेदनेन कुण्ठितस्त्वं शतवल्शो विरुह्य पुनर्वृद्धिमाप्नुहि इत्याशासानः आत्मकृत हिंसनफलकक्षतिः मे माभूदिति, सहस्रवल्शं विवयगंरुहेम इत्यात्मानं प्रत्यभिमृशति। एवं सोमयागादिषु पशुबन्धनार्थमावश्यको यो यूपस्तम्भः सः वृक्षच्छेदनद्वारा सम्पादनीयः तद्वृक्षच्छेदनसमये ओषधेत्रयस्वैनग्ग् स्वधिते मैनग् हिग् सीः [6] (कृ.य.सं-3-2-5) इति मन्त्रेण दर्भान्तरितवृक्षभागं स्वधितिना प्रहरत्यध्वर्युः, अस्यायं भावः - हे ओषधे हे बर्हिः त्वं यूपार्थमिमंवृक्षं छेदनात् त्रायस्व, अस्य वृक्षस्य यागसाधनत्वात् अत्यन्तपापजन्मनः वृक्षस्य वृक्षत्वं मोचयित्वा उत्तमां गतिं प्रापय इति प्रार्थयते।

सोमयागदिषु पशोः देवतार्थमेव हवीरूपेण समर्प्यमाणत्वेन अयं पशुः स्वस्य यजमानस्य च उत्तमलोकप्रापकस्सन् सर्वलोकक्षेमकरोभवतीति श्रुतितात्पर्यं जानानः महाकविः कालिदासः अभिज्ञानशाकुन्तल नाटके षष्ठाङ्कारम्भे इमं श्लोकं श्रावयामास –

सहजं किल यद्विनिन्दितं न हि तत्कर्म विवर्जनीयम्।
पशुमरण कर्मदारुणोऽनुकम्पामृदुरेव श्रोत्रियः[7] ।इति ।।

अयमर्थः – यद्यपिमत्स्यबन्धन, तद्भक्षणयोः अन्यदृष्ट्या विनिन्दितत्वेऽपि धीवराणां तत्कर्म सहजं, तैः न वर्जनीयञ्च तथैव सोमयागादिषु पश्वालंभनात्मकं श्रोत्रियकृतं कर्म अन्यदृष्ट्या यद्यपि दारुणमेव, तथाऽपि शास्त्रदृष्ट्या सर्वलोकोपकारकत्वेन श्रुतिविहितत्वेन च इदं कर्म योग्यमेव, श्रोत्रियस्य सहजमेव तेन विसर्जनीयं न भवति । किन्तु श्रोत्रियः तस्मिन् पशौ स्वस्योत्तमलोकप्राप्ति -सम्पादनद्वारा दयालुरेव, अत एव तस्मिन्

[5] तै.ब्रा. 3-2-2

[6] कृ.य.स.- 3-2-5

[7] अ.शा. 6-1

पशौ मृदुरेव न कठिनः इति अहिंसैवेयमिति श्रुत्यर्थरहस्यं अहिंसातत्वं महाकविः कालिदासः स्वीयनाटके विशदीचकार। अत्र स्मृतिकारा अपि एवं भणन्ति

यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा।
यज्ञस्य भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः[8]।।
ओषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा ।
यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युत्सृतीः पुनः[9] ।इति।।

व्रीहियवाद्याः ओषधयः, पशवश्छागगवाद्याः, वृक्षाः यूपाद्यार्थाः, तिर्यञ्च कूर्मादयः, पक्षिणः कपिञ्जलाद्याः यज्ञार्थं विनाशं गताः पुनः उत्कृष्टां गतिञ्च प्राप्नुवन्तीति एवं यज्ञस्य लोकोपकारैकप्रयोजनत्वात् यज्ञे वधः अवध एव इति।
एवञ्च पूर्वोक्त व्रीह्यवहनन-दर्भलवन-वृक्षच्छेदन-गवालम्भनादि दृष्टान्तानि, "जिवो ब्रह्मैव नापरः" इति सिद्धान्तस्य अनुष्ठापनदिशायां यजमानं सर्वं माणवकञ्च प्रक्रामयति वैदिककर्मकाण्डः, एवं सर्वजीवसमभावनात्मिका साधुरीतिदर्शिनी वैदिकसंस्कृतिः, वैदिकवाङ्मयश्च ।।

हिंसा द्वेष एव हि हिंसा स्यात् प्रेमैवाहिंसनं मतम् ।
प्रयोज्यस्य प्रयोक्तुश्चाप्युभे दत्तस्समं फलम्।।

यदि यः कश्चन इतरं मनुजं निर्व्याजमुपचीकीर्षति । तेनोपकर्तुरूपकार्यस्यचोभयोः मनसी तुष्यतः । एवं यः कश्चन अन्यं जिघंसति हन्ति वा तस्य हिंसकस्य हतस्य च मनसी उद्विग्ने भवतः । हिंसा प्रयोजकस्तावत् फलमुभे सममनुभवतः ।
अतः सर्वजीविषु समभावनया प्रवर्तितव्यम् न केवलं जीवमात्रेषु अपितु पञ्चभूतानां पर्यावरणविषये च अहिंसाभावनया संभावनीयम् । पर्यावरणसंरक्षणं मानवमौल्येषु प्रमुखतामावहति । अस्माकं परितः यदावरणं तदेव पर्यावरणपदेन व्यवह्रियते । वायुजलपृथ्वीतेजोगगनाख्यानि पञ्चमहाभूतानि, वनस्पतयः, ओषधयो जलचरखेचर-सरीसृपकीटादयो जन्तवः, पालितपशव आरण्यकाः पशवोऽन्यानि च निसर्गजातानि वस्तूनि भवन्ति। एतेषां समेषां समष्टिः पर्यावरणं कथ्यते वैदिककालादेव पर्यावरणं प्रति काचिदसामान्या चेतना दृश्यते । एतस्मादेव कारणात् पर्यावरणोपादानीभूत वनस्पत्योषध्यादिषु वा नदीपर्वतादिषु वा जलवायुप्रभृतिषु वा तत्तदभिमानिदेवानां सद्भावोऽभ्युपगतः । यथा बादरायण-सायणवचनैरभ्युपगम्यते –
"ओषध्यादिमन्त्रेष्वपि चेतना एव तत्तदभिमानिदेवतास्तेन तेन नाम्ना सम्बोध्यन्ते"[10] (ऋग्वेदभाष्यभूमिका)
"अभिमानिव्यापदेशस्तु विशेषानुगतिभ्याम्" इति ब्रह्मसूत्रेषु पर्यावरणचेतनाचित्रणस्य
परम्परेयमृग्वेदादारभ्याधुनिककालविरचितसाहित्यं यावत्प्रसरति। महर्षिवाल्मीकिविरचित रामायण -काव्ये अत्यन्तं पर्यावरणसंरक्षणं दरीदृश्यते, अस्य काव्यस्योपक्रम एव पर्यावरणचेतना सम्पोषणपरः इति प्रतिभाति । कलकलनिनादव्यार्थितहृदयस्य महर्षेर्वाल्मीकेर्मुखान्निस्सृतः शोक एव श्लोकीभाव सम्प्राप्त इति रामायणकाव्योपक्रमः कामप्यलौकिकीं पर्यावरणचेतनां चित्रयति । पर्यावरणचेतनाचमत्कृतहृदयस्य भगवतो वाल्मीकेर्निषादमुद्दिश्य शापवचनमेव रामायणकाव्यबीजत्वेन स्वीक्रियते।

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्[11]।।(बा.का. 2-15)
समाक्षरैश्चतुर्भिर्यः पादैर्गीतो महर्षिणा ।
सोऽनुव्याहरणाद्भूयः शोकः श्लोकत्वमागतः[12] ।। इति(बा.का-2-40)

[8] मनु.स्मृ. 5-39

[9] मनु.स्मृ. 5-40

[10] ऋग्बेदभाष्यभूमिका

[11] बा.का. 2-15

[12] बा.का. 2-40

अद्यत्वे नवप्रस्तरयुगे वन्यजीवसंरक्षणविषयिका या चेतना महताऽयासेन सर्वकारशासनेन सम्प्रसार्यते। तस्याः पूर्णपरिपाको भगवतो वाल्मीकेः शापश्लोके रामायणकाव्योपक्रमरूपे दृश्यते । एवमेवास्य रामायणमहाकाव्यस्योपसंहारोऽपि सीतादेव्या रसातलप्रवेशवर्णनव्याजेन तामप्यलोकसामान्यां पर्यावरणचेतनां प्रमाणयति। रामायणीयकथावस्तुनि सीतारामयोर्वृत्तान्तं आधिकारिकवृत्तरूपेण स्वीकृतोऽस्ति । रामः पुत्रेष्टियज्ञप्रभावोत्पन्नोऽस्ति। सीता च वसुन्धरायाः पुत्री रूपा वर्णिताऽस्ति । सीता इत्यभिधानेऽपि "हल्या" भूमेस्तात्पर्यं निहितमस्ति।

वस्तुगत्या वाल्मीकीरामायणे सीता वसुधायाः प्रतिनिधिरूपा अस्ति। यथा वीरपुरुषेण भूमिः पराक्रमेण जीयते। तथैव सीता रामेण पराक्रमेण विजिताऽस्ति । यथा वा वसुधायाः शत्रुनृपेण बलाद्हरणं क्रियते ।तथैव सीता अपि रावणेन बलादपहृता । पुनर्यथा शत्रुं विजित्य भूमिं मोचयति नृपः, तद्वत् रामोऽपि रावणं हत्वा सीतां मोचयति। यथा वा लोके भूमिशोधनं क्रियते तथैव रामायणे सीताया अग्निपरिशुद्धिर्वर्णिता वाल्मीकिना । एवं सम्पूर्णरामायणे सीताव्याजेन भूमिविषयिका पर्यावरणचेतना एव सम्यग्रूपेणोपनिबद्धा। एवं बालकाण्डे गङ्गावतरणोपाख्याने सगरपुत्राणामुद्धरणं, गङ्गाजलस्पर्शेनोपनिबद्धां प्रकारान्तरेण महर्षिर्जलविषयिकां पर्यावरणचेतनामेव निबध्नाति । रामायणकथावस्तुनि वायुतत्वस्य प्रतिनिधिभूतोऽस्ति पवनपुत्रो हनुमान् । वाल्मीकीरामायणे जन्मवृत्तवर्णनप्रसङ्गे पवनस्यानिवार्यता जीवलोकाय सम्यग्रूपेण चित्रिता । एवं गगनविषयेऽपि गगनं शब्दगुणकमिति कथ्यते । ध्वनिप्रदूषणेन गगनभूतस्य पर्यावरणस्यापि हानिर्भवति ।रामायणे महर्षिणा लवकुशमधुरगीतिजन्यध्वनिप्रभावः "आयुष्यं पुष्टिजननं सर्वश्रुतिमनोहरमिति" वर्णितः। काव्येऽस्मिन् तेजसा संसक्ता पर्यावरणचेतनाऽपि साधु निबद्धाऽस्ति । आदित्यप्रसादेनैव रामो रावणं हंन्तु शक्नोति प्रतिपादयन् महर्षिः पर्यावरणघटकेषु तेजसो माहात्म्यं स्पष्टी चकार। एवं रूपेण पर्यावरणसंरक्षणाय रामायणमहाकाव्य पञ्चभूतानां वर्णनं कथावस्तुभिः तुलनञ्च वाल्मीकिना निरूपितं वर्तते।

एवं पर्यावरणसंरक्षणविषयेऽपि कृष्णयजुर्वेदाऽरण्यके आरुणकेतुके अमृतं वा आपः। अमृतस्यानन्तरित्यै। नाप्सुमूत्रपुरीषं कुर्यात्। न निष्ठीवेत् [13] इत्यादि मन्त्राः अत्यन्तं मानवान् उपदेशयन्ति कार्यकार्यविषये च । एवमेव सत्यं वद। धर्मं चर। मातृदेवो भव। पितृदेवो भव। सत्यान्नप्रमदितव्यम्। धर्मान्नप्रमदितव्यम्। [14] इत्यादि मानवीयमौल्यानि वेदादेव प्रसिद्ध्यन्ति।

अभ्यागत विषयेऽपि श्रुतिरेवमुपदिशति। नकञ्चन वसतौ प्रत्याचक्षीत[15]। निवासार्थं स्वगृहे समागतं कमपि न निवारयेत्। तस्माद्ययाकयाच विधया बह्वन्नं प्राप्नुयात् [16] ।इति अभ्यागतं अतिथ्यर्थं याजनाध्यापनप्रतिग्रहाणां मध्ये येन केनापि प्रकारेणान्नसमृद्धिं सम्पादयेदिति । एतादृशपरमोत्कृष्टानि मानवीयमौल्यानि वेदेषु निगूढतया नैकानि प्रसिद्धानि वरीवर्तन्ते । एवञ्च वेदेषु मानवीयमौल्यानि अहिसा प्रतिपादितानि, पर्यावरणसंरक्षकाणि, सर्वजीव- समभवनाप्रचोदकानि, माणवकस्योत्तमजीवनार्थं समाचरितव्यानि यदामुष्मिकप्रदायकानि वर्त्मानि अनेकानि भवन्त्येव । अत एव –

चातुर्वर्ण्यं त्रयोलोकाश्चत्वारश्चाश्रमाः पुथक्।
भूतं भव्यं भविष्यञ्च सर्वं वेदात्प्रसिद्ध्यति ।।

इति प्रसिद्धमाभाणकं स्मारंस्मारं उपसंह्रियते ।

**सङ्केताक्षरसूची**

1. तैत्तिरीयब्राह्मणम् - तै.ब्रा
2. मनुस्मृतिः - मनु.स्मृ

[13] तै.आ. 1-26-112

[14] तै.उ. 1-11-19, 20

[15] तै.उ. 3-9

[16] तै.उ. 3-9

3. यमस्मृतिः - य.स्मृ
4. भगवद्गीता - भ.गी
5. कृष्णबजुर्वेद् संहिता - कृ.य.स.
6. अभिज्ञानशाकुन्तलम् - अ.शा
7. बालकाण्डम् - बा.का
8. तैत्तिरीयारण्यकम् - तै.आ
9. तैत्तिरीय उपनिषत् - तै. उ

**अनुशीलितग्रन्थसूची**


1. मनुस्मृतिः मोतीलाल बनारसीदासः, बालारोड, जबहर नगरः, डिल्ली -110007
2. यमस्मृतिः चौस्वाम्बा संस्कृत संस्थान, गोपाल मन्दिर लोन, वाराणसी - 221001
3. कृष्णयजुर्वेदभाष्यम् वैदिक संशोधन मण्डलम, पूने-411037
4. तैत्तिरीयब्राह्मणम् श्री नृसिंहप्रिया ट्रष्ट, 30, वेङ्कटेश अग्रहारम्, मयूरपुरी, चेन्नै- 500004
5. अभिज्ञानशाकुन्तलम् चौखाम्बा संस्कृत संस्थान, गोपाल मन्दिर लोन, वाराणसी - 221001
6. श्रीमद्वाल्मीकि रामायणम् गीताप्रेस, गोरख पूर इंडिया – 273012
7. श्री मद्भगवद्गीता गीताप्रेस, गोरख पूर इंडिया – 273012